कवचं राघवेंद्रस्य यतींद्रस्य महात्मनः ।
वक्ष्यामि गुरुवर्यस्य वांछितार्थप्रदायकम ॥ १ ॥
ऋषिरस्याप्पणाचार्यः छंदोस्नुष्टुप प्रकीर्तितम ।
दॆवता श्रीराघवॆंद्रगुरुरिर्थसिद्धयॆ ॥ २ ॥
अष्टोत्तरशतं जप्यं भक्तियुक्तेन चेतसा ।
उद्‍यत्प्रद्‍योतनद्‍योतभर्मकूर्मासने स्थितम ॥ ३ ॥
एद्‍यखद्‍योतनद्‍योतप्रतापं राममानसम ।
धृतकाषायवसनं तुलसीहारवक्षसम ॥ ४ ॥
दोर्दंडविलसद्दंडकमंडलुविराजितम ।
अभय ज्ञानमुद्राक्षमालाशीलकरांबुजम ॥ ५ ॥
योगींद्रवंद्‍यपादाब्जं राघवेंद्रगुरुं भजे ।
शिरो रक्षतु मे नित्यं राघवेंद्रोस्खिलेष्टदः ॥ ६ ॥
पापाद्रिपाटने वज्रः केशान रक्षतु मे सदा ।
क्षमासुरगणाधीशो मुखं रक्षतु मे गुरुः ॥ ७ ॥
हरिसेवालब्धसर्वसंपत्फालं ममावतु ।
देवस्वभावोस्वतु मे दृशौ तत्त प्रदर्शकः ॥ ८ ॥
इष्टप्रदाने कल्पद्रुः श्रोत्रे श्रुत्यर्थबोधकः ।
भव्यस्वरूपो मे नासां जिह्वां मेस्वतु भव्यकृत ॥ ९ ॥
आस्यं रक्षतु मे दुःखतूलसंघाग्निचर्यकः ।
सुखधैर्यादिसुगुणो भ्रुवौ मम सदास्वतु ॥ १० ॥
ओष्ठौ रक्षतु मे सर्वग्रहनिग्रहशक्तिमान ।

www.yousigma.com

उपप्लवोदधेस्सेतुर्दंतान रक्षतु मे सदा ॥ ११ ॥
निरस्तदोषो मे पातु कपोलौ सर्वपालकः ।
निरवद्यमहावेषः कंठं मेस्वतु सर्वदा ॥ १२ ॥
कर्णमूले तु प्रत्यर्थिमूकत्वाकरवाङ मम ।
बहुवादिजयी पातु हस्तौ सत्ततत्त्ववादकृत ॥ १३ ॥
करौ रक्षतु मे विद्वत्परिज्ञेयविशेषवान ।
वाग्वैखरीभव्यशेषजयी वक्षस्थलं मम ॥ १४ ॥
सतीसंतानसंपत्तिभक्ति ज्ञानादिवृद्धिकृत ।
स्तनौ रक्षतु मे नित्यं शरीरावद्यहानिकृत ॥ १५ ॥
पुण्यवर्धनपादाब्जाभिषेकजलसंचयः ।
नाभिं रक्षतु मे पा द्युनदीतुल्यसद्गुणः ॥ १६ ॥
पृष्टं रक्षतु मे नित्यं तापत्रयविनाशकृत ।
कटिं मे रक्षतु सदा वंध्यासत्पुत्रदायकः ॥ १७ ॥
जघनं मेस्वतु सदा व्यंगस्वंगसमृद्धिकृत ।
गुह्यं रक्षतु मे पापग्रहारिष्टविनाशकृत ॥ १८ ॥
भक्ताघविध्वंसकरनिजमूर्तिप्रदर्शकः ।
मूर्तिमान्पातु मे रोमं राघवेंद्रो जगद्गुरुः ॥ १९ ॥
सर्वतंत्रस्वतंत्रोस्सौ जानुनी मे सद्रावतु ।
जंघे रक्षतु मे नित्यं श्रीमध्वमतवर्धनः ॥ २० ॥
विजयींद्रकराब्जोत्थसुधींद्रवरपुत्रकः ।
गुल्फौ श्रीराघवेंद्रो मे यतिराट सर्वदास्वतु ॥ २१ ॥

पादौ रक्षतु मे सर्वभयहारी कृपानिधिः ।
ज्ञानभक्तिसुपुत्रायुर्यशः श्रीपुण्यवर्धनः ॥ २२ ॥
करपादांगुलीः सर्वा ममावतु जगद्गुरुः ।
प्रतिवादिजयस्वांतभेदचिह्नादरो गुरुः ॥ २३ ॥
नखानवतु मे सर्वान सर्वशास्त्रविशारदः ।
अपरोक्षीकृतश्रीशः प्राच्यां दिशि सदास्वतु ॥ २४ ॥
स दक्षिणे चावतु मां समुपेक्षितभावजः ।
अपेक्षितप्रदाता च प्रतीच्यामवतु प्रभुः ॥ २५ ॥
दयादाक्षिण्यवैराग्यवाक्पाटवमुखांकितः ।
सदोदीच्यामवतु मां शापानुग्रहशक्तिमान ॥ २६ ॥
निखिलेंद्रियदोषघ्नो महानुग्रहकृद्गुरुः ।
अधश्चोर्ध्वं चावतु मामष्टाक्षरमनूदितम ॥ २७ ॥
आत्मात्मीयाघराशिघ्नो मां रक्षतु विदिक्षु च ।
चतुर्णां च पुमर्थानां दाता प्रातः सदास्वतु ॥ २८ ॥
संगमेवतु मां नित्यं तत्त्ववित्सर्वसौख्यकृत ।
मध्याह्नेऽगम्यमहिमा मां रक्षतु महायशाः ॥ २९ ॥
मृतपोतप्राणदाता सायाह्ने मां सदास्वतु ।
वेदिस्थपुरुषोज्जीवी निशीथे पातु मां गुरुः ॥ ३० ॥
वह्निस्थमालिकोद्धर्ता वह्नितापात्सदास्वतु ।
समग्रटीकाव्याख्याता गुरुर्मे विषयेस्वतु ॥ ३१ ॥
कांतारेवतु मां नित्यं भाट्ट (भाष्य) संग्रहकृद्गुरुः ।

www.yousigma.com

सुधापरिमळोद्धर्ता सु (स्व)च्छंदस्तु सदास्वतु ॥ ३२ ॥
राजचोरविषव्याधियादोवन्यमृगादिभिः ।
अपस्मारापहर्ता नः शास्त्रवित्सर्वदास्वतु ॥ ३३ ॥
गतौ सर्वत्र मां पातूपनिषदर्थकृद्‌गुरुः ।
ऋग्व्याख्यानकृदाचार्यः स्थितौ रक्षतु मां सदा ॥ ३४ ॥
मंत्रालयनिवासी मां जाग्रत्काले सदास्वतु ।
न्यायमुक्तावलीकर्ता स्वप्ने रक्षतु मां सदा ॥ ३५ ॥
मां पातु चंद्रिकाव्याख्याकर्ता सुप्तौ हि तत्त कृत ।
सुतंत्रदीपिकाकर्ता मुक्तौ रक्षतु मां गुरुः ॥ ३६ ॥
गीतार्थसंग्रहकरस्सदा रक्षतु मां गुरुः ।
श्रीमध्वमतदुग्धाब्धिचंद्रोस्वतु सदास्नघः ॥ ३७ ॥
इति श्रीराघवेंद्रस्य कवचं पापनाशनम ।
सर्वव्याधिहरं सद्‌यः पावनं पुण्यवर्धनम ॥ ३८ ॥
य इदं पठते नित्यं नियमेन समाहितः ।
अदृष्टिः पूर्णदृष्टिः स्यादेडमूकोस्पि वाक्पतिः ॥ ३९ ॥
पूर्णायुः पूर्णसंपत्तिभक्ति ज्ञानाभिवृद्धिकृत ।
पीत्वा वारि नरो येन कवचेनाभिमंत्रितम ॥ ४० ॥
जहाति कुक्षिगान रोगान गुरुवर्यप्रसादतः ।
प्रदक्षिणनमस्कारान गुरोर्वृंदावनस्य यः ॥ ४१ ॥
करोति परया भक्त्या तदेतत्कवचं पठन ।
पंगुः कूणिश्च पौगंडः पूर्णांगो जायते ध्रुवम ॥ ४२ ॥

शेषाश्च कुष्ठपूर्वाश्च नश्यंत्यामयराशयः ।
अष्टाक्षरेण मंत्रेण स्तोत्रेण कवचेन च ॥ ४३ ॥
वृंदावने सन्निहितमभिषिच्य यथाविधि ।
यंत्रे मंत्राक्षराण्यष्टौ विलिख्यात्र प्रतिष्ठितम ॥ ४४ ॥
षोडशैरुपचारैश्च संपूज्य त्रिजगद्गुरुम ।
अष्टोत्तरशताख्याभिरर्चयेत्कुसुमादिभिः ॥ ४५ ॥
फलैश्च विविधैरेव गुरोरर्चां प्रकुर्वतः ।
नामश्रवणमात्रेण गुरुवर्यप्रसादतः ॥ ४६ ॥
भूतप्रेतपिशाचाद्याः विद्रवंति दिशो दश ।
पठेदेतत्त्रिकं नित्यं गुरोर्वृंदावनांतिके ॥ ४७ ॥
दीपं संयोज्य विद्यावान सभासु विजयी भवेत ।
राजचोरमहाव्याघ्रसर्पनक्रादिपीडनात ॥ ४८ ॥
कवचस्य प्रभावेण भयं तस्य न जायते ।
सोमसूर्योपरागादिकाले वृंदावनांतिके ॥ ४९ ॥
कवचादित्रिकं पुण्यमप्पणाचार्यदर्शितम ।
जपेद्यः स धनं पुत्रान भार्यां च सुमनोरमाम ॥ ५० ॥
ज्ञानं भक्तिं च वैराग्यं भुक्तिं मुक्तिं च शातीम ।
संप्राप्य मोदते नित्यं गुरुवर्यप्रसादतः ॥ ५१ ॥
॥ इति श्रीमदप्पणाचार्यविरचितं श्रीराघवेंद्रकवचं संपूर्णम ॥